shrIkRiShNasharaNAShTakam

# શ્રીકૃષ્ણશરણાષ્ટકમ્

## Document Information

Text title : kRRiShNasharaNAShTakam 2

File name : kRRiShNasharaNAShTaka.itx

Category : aShTaka, vishhnu, krishna, vishnu, raghunAthajI, puShTimArgIya

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 22, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણશરણાષ્ટકમ્

દ્વિદલીકૃતદૃક્સ્વાસ્યઃ પન્નગીકૃતપન્નગઃ ।
કૃશીકૃતકૃશાનુશ્ચ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૧॥

ફલીકૃતફલાર્થી ચ કુસ્સિતીકૃતકૌરવઃ ।
નિર્વાતીકૃતવાતારિઃ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૨॥

કૃતાર્થીકૃતકુન્તીજઃ પ્રપૂતીકૃતપૂતનઃ ।
કલઙ્કીકૃતકંસાદિઃ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૩॥

સુખીકૃતસુદામા ચ શઙ્કરીકૃતશઙ્કરઃ ।
સિતીકૃતસરિન્નાથઃ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૪॥

છલીકૃતબલિધ્રૌર્યો નિધનીકૃતધેનુકઃ ।
કન્દર્પીકૃતકુબ્જાદિઃ શ્રીકૃષ્ણ શરણં મમ ॥ ૫॥

મહેન્દ્રીકૃતમાહેયઃ શિથિલીકૃતમૈથિલઃ ।
આનન્દીકૃતનન્દાદ્યઃ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૬॥

વરાકીકૃતરાકેશો વિપક્ષીકૃતરાક્ષસઃ ।
સન્તોષીકૃતસદ્ભક્તઃ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૭॥

જરીકૃતજરાસન્ધઃ કમલીકૃતકાર્મુકઃ ।
પ્રભ્રષ્ટીકૃતભીષ્માદિઃ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૮॥

શ્રીકૃષ્ણઃ શરણં મમાષ્ટકમિદં પ્રોત્થાય યઃ સમ્પઠેત્
સ શ્રીગોકુલનાયકસ્ય પદવી સંયાતિ ભૂમીતલે ।
પશ્યત્યેવ નિરન્તરં તરણિજાતીરસ્થકેલી પ્રભોઃ
સમ્પ્રાપ્નોતિ તદીયતાં પ્રતિદિનં ગોપીશતૈરાવૃતામ્ ॥ ૯॥

॥ ઇતિ શ્રીદેવકીનન્દનાત્મજ શ્રીરઘુનાથપ્રભુકૃતં
શ્રીકૃષ્ણશરણાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*shrIkRiShNasharaNAShTakam*

pdf was typeset on July 22, 2023

Please send corrections to *sanskrit@cheerful.com*